# Shri Sankata Ratrikalina Stutih

# શ્રીસઙ્કટારાત્રિકાલીનસ્તુતિઃ

## Document Information

Text title : sankaTArAtrikAlInastutiH

File name : sankaTArAtrikAlInastutiH.itx

Category : devii, otherforms, devI

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : Collection of shlokas from various sources

Latest update : December 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 4, 2022

*sanskritdocuments.org*

# શ્રીસઙ્કટારાત્રિકાલીનસ્તુતિઃ

દુર્ગે સ્મૃતા હરસિ ભીતિમશેષજન્તોઃ
    સ્વસ્થૈઃ સ્મૃતા મતિમતીવ શુભાં દદાસિ ।
દારિદ્ર્ય-દુઃખ-ભય-હારિણિ કા ત્વદન્યા
    સર્વોપકાર-કરણાય સદાઽઽર્દ્રચિત્તા ॥ ૧॥

યા શ્રીઃ સ્વયં સુકૃતિનાં ભવનેષ્વલક્ષ્મીઃ
    પાપાત્મનાં કૃતધિયાં હૃદયેષુ બુદ્ધિઃ ।
શ્રદ્ધા સતાં કુલજનપ્રભવસ્ય લજ્જા
    તાં ત્વાં નતાઃ સ્મ પરિપાલય દેવિવિશ્વમ્ ॥ ૨॥

રોગાનશેષાનપહંસિ તુષ્ટા
    રુષ્ટા તુ કામાન્ સકલાનભીષ્ટાન્ ।
ત્વામાશ્રિતાનાં ન વિપન્નરાણાં
    ત્વામાશ્રિતા હ્યાશ્રયતાં પ્રયાન્તિ ॥ ૩॥

યા કુન્દેન્દુ-તુષાર-હાર-ધવલા યા શુભ્રવસ્ત્રાવૃતા
    યા વીણા-વરદણ્ડ-મણ્ડિતકરા યા શ્વેતપદ્માસના ।
યા બ્રહ્માઽચ્યુત-શઙ્કર-પ્રભૃતિભિર્દેવૈઃ સદા વન્દિતા
    સા માં પાતુ સરસ્વતી ભગવતી નિશ્શેષજાડ્યાપહા ॥ ૪॥

યા માયા મધુકૈટભ-પ્રમથિની યા માહિષોન્મૂલની
    યા, ધૂમ્રેક્ષણ-ચણ્ડ-મુણ્ડમથિની યા રક્તબીજાસિની ।
શક્તિઃ શુમ્ભ-નિશુમ્ભ-દૈત્યદલિની યા સિદ્ધિલક્ષ્મીઃ પરા
    સા દુર્ગા નવકોટિશક્તિસહિતા માં પાતુ વિશ્વેશ્વરી ॥ ૫॥

મધ્યે દુગ્ધપયોનિધૌ ત્રિઘટિકા હેમસ્તની નન્દનં
    તન્મધ્યે મણિમણ્ડપં તદુપરિ શ્રીચક્રરાજાન્વિતમ્ ।
તસ્મિન્ પાશ-ધનુઃશરાઙ્કુશધરાં માણિક્યભૂષાલસાં
    મુક્તાહાર-પયોધરાં ત્રિનયનાં વન્દે પરાં સુન્દરીમ્ ॥ ૬॥

સુધાસિન્ધોર્મધ્યે સુર-વિટપ-વાટી-પરિવૃતે
    મણિદ્વીપે નીપોપવનવતિ ચિન્તામણિગૃહે ।
શિવાકારે મઞ્ચે પરમશિવ-પર્યઙ્કનિલયાં
    ભજન્તિ ત્વાં ધન્યાઃ કતિચન ચિદાનન્દલહરીમ્ ॥ ૭॥

શુક્લાં બ્રહ્મવિચારસારપરમામાદ્યાં જગદ્વ્યાપિનીં
    વીણા-પુસ્તક-ધારિણીમભયદાં જાડ્યાન્ધકારાપહામ્ ।
હસ્તે સ્ફાટિકમાલિકાં વિદધતીં પદ્માસને સંસ્થિતાં
    વન્દે ત્વાં પરમેશ્વરીં ભગવતીં બુદ્ધિપ્રદાં શારદામ્ ॥ ૮॥

ચતુર્ભુજે ચન્દ્રકલાવત્તંસે કુચોન્નતે કુઙ્કુમરાગશોણે ।
કોદણ્ડ-પાશાઙ્કુશ-પુષ્પબાણ-હસ્તે નમસ્તે જગદેકમાતઃ ॥ ૯॥

અરુણાં કરુણાત્તરઙ્ગિતાક્ષીં ધૃત-પાશાઙ્કુશ-પુષ્પ-બાણ-ચાપમ્ ।
અણિમાદિભિરાવૃતાં મયૂખૈ-રહમિત્યેવ વિભાવયે ભવાનીમ્ ॥ ૧૦॥

ૐ યજ્ઞેન યજ્ઞમયજન્ત દેવાસ્તાનિ ધર્માણિ પ્રથમાન્યાસન્ ।
તે હ નાકં મહિમાનઃ સચન્ત યત્ર પૂર્વે સાધ્યાઃ સન્તિ દેવાઃ ॥ ૧૧॥

ૐ શ્રીશ્ચતેલક્ષ્મીશ્ચપત્ન્યાવહોરાત્રે પાર્શ્વેનક્ષત્રાણિરૂપમશ્વિનૌ વ્યાત્તમ્ ।
ઇષ્ણન્નિષાણામું મ ઇષાણ સર્વલોકં મ ઇષાણ ॥ ૧૨॥

વિશ્વતશ્ચક્ષુરુત વિશ્વતોમુખો વિશ્વતો બાહુરુત વિશ્વતસ્પાત્ ।
સમ્બાહુભ્યાં ધમતિ સમ્પતત્રૈર્દ્યાવા-ભૂમિં જનયન્દેવ એકઃ ॥ ૧૩॥

ઇતિ સઙ્કટા-રાત્રિકાલીન સ્તુતિઃ સમાપ્તા ।

Proofread by Rajesh Thyagarajan

*Shri Sankata Ratrikalina Stutih*

pdf was typeset on December 4, 2022

Please send corrections to *sanskrit@cheerful.com*